# Meaning of नेक्षेतोद्यन्तमादित्यम्

नेक्षेतोद्यन्तमादित्यं नास्तंयन्तं कदाचन ।
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम् ॥ मनुस्मृतिः , 4-37

भृगु , the author of मनुस्मृति , prescribes certain common / universal civil code in fourth अध्याय , that is useful not only in attaining धर्म but also in leading a happy and healthy life - one should never stare at rising / setting / midday / eclipsed / water-reflected Sun (this may cause myopia / ह्रस्वदृष्टि or may weaken the नेत्रेन्द्रियम् ) ।

One may look but should not stare.

The gamut of sentences can be put under two headings -- विधि or निषेध (do / do not do ) -- the rest of the sentences fall under स्तुत्यर्थवाद or निन्दार्थवाद (commendation or condemnation) and get construed with विधि or निन्दा , as the case may be.

This is universal.

वाक्यम् is the unit of a language -

if the meaning is short then a वाक्यम् is employed and if the meaning is large then a महवाक्यम् is employed .

iff a group of पद-s / अवान्तरवाक्य-s denote a single meaning / purpose , and if , when separated , each पदम् / अवान्तरवाक्यम् is found to be wanting , then that group of पद-s / अवान्तरवाक्य-s is called a वाक्यम् / महावाक्यम् --

अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् ( पू मी सू 2-1-14-46) (योग्यता and आसत्ति/सन्निधि are implied , so not stated by Jaimini).

महावाक्यम् has no limit - it depends on विवक्षा -- 'वर्णशतं वर्णसहस्रं वा' (कुमारिलः) --

रामायणम् / भारतम् is a महावाक्यम् (साहित्यदर्पणम्-2 ) ।

Sabaraswamy (6-4-7-25) says the following --

न च महावाक्ये सति अवान्तरवाक्यं प्रमाणं भवति , पदान्तरस्य बाधनात् , यथा नोद्यन्तमादित्यमीक्षेत इति प्रतिषेधो गम्यते महावाक्यात् , अवान्तवाक्यात् ईक्षणविधानम् ।

What Sabaraswamy thinks is -- प्राप्तिपूर्वको हि निषेधः - if there is विधि then only निषेध -- here the अवान्तरवाक्यम् , 'आदित्यम् ईक्षेत ', denotes विधि-- it is an अवान्तरवाक्यम् because it has got आकाङ्क्षा with another पदम् ' न ' -- so , नोद्यन्तमादित्यमीक्षेत is a महावाक्यम् । Otherwise, there will be बाध to the word 'न' ।

Kumarilabhatta , in this context offers a simile --

सर्वत्र अवान्तरवाक्यानि महावाक्येषु अप्रमाणम् , महासंख्यासु इव अवान्तरसंख्या भवति ।

There is a महासंख्या -- 79,94,368 - in this there are अवान्तरसंख्या-s such as - 79 -- 943 -- 68 -- can these be taken as प्रमाणम्? No - same is the case in language also.

Here is a sentence in the Brahma Sutra Bhashya 1.3.33 of Shankara:

न हि महावाक्येऽर्थप्रत्यायकेऽवान्तरवाक्यस्य पृथक्प्रत्यायकत्वमस्ति ; यथा 'न सुरां पिबेत्' इति नञ्वति वाक्ये पदत्रयसम्बन्धात्सुरापानप्रतिषेध in a context. I cited this just because of the very close similarity it has with the Sabara bhashya cited above.

वाकोवाक्यम् (question and answer) also falls under Mahavakyam . Here is an example by Bhojaraja in Srngaraprakasa (8) --

बाले ! नाथ ? विमुञ्च मानिनि रुषं , रोषान्मया किं कृतम् ?

खेदो'स्मासु ! न मे'पराध्यति भवान् , सर्वे'पराधा मयि !

तत्किं रोदिषि गद्गदेन वचसा ? कस्याग्रतो रुद्यते ?

नन्वेतन्मम ! का तवास्मि ? दयिता ! नास्मीत्यतो रुद्यते !!

The concept of Mahavakya in Vedanta is , in fact, secondary -- tattvamasi is a Vakya pregnant with meaning of the entire Upanisat - so following arthagaurava it is styled Mahavakya - not Sabdagaurava ( like Ramayana etc.) .

# जामिता / जामित्वम्

जामिता / जामित्वम् = आलस्यम्

**तैत्तिरीयसंहिता - पूर्वमीमांसा - व्याकरणम्**

उपांशुयाजाधिकरणम् - पूर्वमीमांसा ( अध्यायः 2 पादः 2 आधिकरणम् 4 सूत्रम् 9 )

पौर्णमासीवत् उपांशुयाजः स्यात् (पूर्वपक्षसूत्रम्)

पौर्णमासीवत् = just like the word पौर्णमासी in विद्वद्वाक्यम् ; उपांशुयाजः = the word उपांशुयाज also ; स्यात् = becomes यागसमुदायानुवादक ।

तैत्तिरीयसंहिता 2-6-6 ( दर्शपूर्णमासयागप्रकरणम् ) ---

जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ , उपांशुयाजमन्तरा यजति । विष्णुरुपांशु यष्टव्यो अजामित्वाय प्रजापतिरुपांशु यष्टव्यो अजामित्वाय । अग्नीषोमावुपांशु यष्टव्यावजामित्वाय ।

(यजति - does not denote a विधि ः यष्टव्यः - denotes विधि ( तव्यत्तव्यानीयरः पा , 3-1-96 , प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च पा 3-3-163 ) |

Here is the question - is it that the sentence ' उपांशुयाजमन्तरा यजति' is an अनुवाद of the प्रकृतयाग-s, which have got विष्णु , प्रजापति and अग्नीषोम as देवता-s or is a विधि of a नूतनयाग ?
The पूर्वपक्ष is - following the term उपांशु , it is an अनुवाद of the three said याग-s . If it is a new याग then the स्वरूपम् of a याग , i e द्रव्यम् and देवता (according to मीमांसा ) are to be mentioned . Therefore the term उपांशुयाग , is an अनुवाद of विष्ण्वादियागसमुदाय ।

Another point -- how come this is a वाक्यम् that is a विधि of a different याग having उपांशुत्वम् as a गुण ? - the question itself is untenable --
here there is simply a term - उपांशुयाजम् - which is an अव्युत्पन्न - such a पदम् cannot become यागविधायकम् - if it is यागविधायक then following the पाणिनिसूत्रम् , चजोः कु घिण्यतोः 7-3-52 , कुत्वम् will be there - then there will be the term - उपांशुयाग ।

(प्रयाजानुयाजौ यज्ञाङ्गे  पा 7-3-62 -- here due to the term यज्ञाङ्गे , it is applicable in the case of all यज्ञाङ्ग - 'फलवत्सन्निधौ अफलं तदङ्गम्' is मीमांसामर्यादा - so since उपांशुयाज is an अङ्ग  and not याग / यज्ञ the कुत्वनिषेध applies -- the निपातशब्द is called अव्युत्पन्न by मीमांसक-s - शाबरभाष्यम् , तन्त्रवार्तिकम् etc) .

सिद्धान्तसूत्रम् --

चोदना वा अप्रकृतत्वात्

चोदना वा = उपांशुयाजपदम् विधिपरमेव न तु अनुवादः ; अप्रकृतत्वात् = उपक्रमे विष्ण्वादियागानाम् अविहितत्वात् ।

उपांशुयाजमन्तरा यजति - is not an अनुवाद of विष्ण्वादियाग but कर्मान्तरविधायक ।

'जामि वा एतद्यज्ञस्य' etc denotes that - if पुरोडाशयाग-s are performed in succession then there will be जामितादोष ( the defect of delay ) to उपांशुयाग ।

Moreover, 'विष्णुरुपांशु यष्टव्यः' etc are अर्थवाद-s but not विधायक-s - they are for अजामितास्तुति - उपांशुयाजमन्तरा यजति is the only विधायकवाक्यम् । If you say that विष्ण्वादिवाक्य-s are also विधायक then there will be a defect called वाक्यभेद (संभवत्येकवाक्यत्वे वक्यभेदस्तु नेष्यते -- श्लोकवार्तिकम्) ।
So in order to avoid जामितदोष - आग्नेययागानन्तरं विष्णुयागं प्रजापतियागम् अग्नीषोमीय(आज्य) यागं वा यदि अनुतिष्ठेत् तदा आग्नेयाग्नीषोमीयपुरोडाशानां मध्ये व्यवधानात् जामितादोषः न भवति इति तात्पर्यम् ।

# अलातचक्रम्

In **पूर्वमीमांसा (श्लोकवार्तिकम्, निरालंबनवादः,** 109-112) --

(एवं स्वप्नप्रत्ययस्य बाह्यालम्बनत्वं दर्शयित्वा जाग्रद्विभ्रमाणां बाह्यालम्बनत्वं दर्शयति -- **न्यायरत्नाकरव्याख्या पार्थसारथिमिश्रस्य**) --

**अलातचक्रे' लातं स्याच्छीघ्रभ्रमणसंस्कृतम्** ।
गन्धर्वनगरे' भ्राणि पूर्वदृष्टं गृहादि च ॥
पूर्वनुभूततोयं च रश्मितप्तोषरं तथा ।
मृगतोयस्य विज्ञाने कारणत्वेन कल्प्यते ॥
द्रव्यान्तरे विषाणं च शशस्यात्म च कारणम् ।
शशशृङ्गधियः , ........... ॥

Patanjali, under **स्त्रियाम्, पा 4-1-3**, while discussing सतः अपि अनुपलब्धिः एवं वृक्षादिगतस्य लिङ्गस्यापि - takes up मृगतृष्णा , गन्धर्वनगरम् and आदित्यगति ।

In **परमार्थसार** also he says --

मृगतृष्णायामुदकं , शुक्तौ रजतं, भुजंगमो रज्ज्वाम् ।
तैमिरिकचन्द्रयुगवत् भ्रान्तमखिलं जगद्रूपम् ॥

शङ्कराचार्य in **तैत्तिरीयोपनिषद्भाष्यम्** --

मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धरः ।
एष वन्ध्यासुतो याति खपुष्पकृतशेखरः ॥

So the difference between Kumarila and others is that he wants अलातचक्रम् to be an अत्यन्तासत् and he extends this , i e बुद्ध्यालम्बनम् as a base of बाह्यालम्बनम् , even to **प्रकृति of सांख्य-s** .

Bhartrhari , in line with Patanjali , uses अलातचक्रम् also , to prove that even if something is available to प्रत्यक्षम् , it is मिथ्या as per अनुमानम् (वाक्यपदीयम् , वाक्यकाण्डः , 291) .

So the term अलातचक्रम् is used for more than one purpose in दर्शन-s .

आलातचक्रम् - is not a correct usage - सामर्थ्याभावात् न तद्धितवृत्तिः । It may be a मुद्राराक्षस।

During दीपावळी - we used to collect the dry sprouts / shoots of a male तालवृक्ष ( palmyra palm) born on the top (in the place of fruits) - burn -make powder - mix with the powder extracted from a dry coconut (by peeling) - make a round pack with a dry cloth - place in a three-stick panel - tie a rope - and rotate it after placing some burning coal on it for a few minutes -- then we see a perfect अलातचक्रम् - a cheap and best item ( salt particles are also added but not advisable ) .

# अनुक्तमन्यतो ग्राह्यम्

It is not a सूत्रम् rather a न्याय (आगमोक्तः), often used across शास्त्रs.

Bonus Info --

**अनुक्तमन्यतो ग्राह्यम् --- परमतम् अप्रतिषिद्धम् अनुमतं भवति** ( **उत्तरतन्त्रम् - सुश्रुतसंहिता** )

अक्षपाद was offering the लक्षणम् of प्रत्यक्षम् --

इन्द्रियार्थसंनिकर्षोत्पन्नं ज्ञानम् अव्यपदेश्यम् अव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ( **न्यायदर्शनम् 1-1-4**)

इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् (**तर्कसंग्रहः**) - is taken from this .

In the above लक्षणम् , ' मनस् ' is not mentioned .

Without मनस् one cannot get ज्ञानम् । Here is **महाभाष्यम् ( परोक्षे लिट्, 3-2-115) --**

अथवा कश्चित् जाग्रदपि वर्तमानं कालं नोपलेभे । तद्यथा वैयाकरणानां शाकटायनो रथमार्गे आसीनः शकटसार्थं यान्तं
नोपलेभे ।
किं पुनः कारणं कश्चित् जाग्रदपि वर्तमानकालं नोपलभते ?

**मनसा प्रयुक्तानीन्द्रियाणि उपलब्धौ कारणानि भवन्ति , मनसः असांनिध्यात्** ।

( ' वैयाकरणानाम् ' - is used to show that he was not 'मत्त ' - सुप्तमत्तयोः उत्तमः ' **वार्तिकम्** । **प्रयुक्तानि** -- so first it is मनस् , then इन्द्रिय and its contact with अर्थ -- not **मनसा संयुक्तानि इन्द्रियाणि** ) ।

वात्स्यायन in his भाष्यम् ( and वार्तिकम् as well ) initially tries to defend अक्षपाद by saying -- भिद्यमानस्य
प्रत्यक्षज्ञानस्य नायं भिद्यते इति समानत्वान्नोक्त इति (this is not tenable - 'on a par with हेत्वाभास ' ।

At the end वात्स्यायन says ( **न्यायभाष्यम् , 1-1-4** )

.......मनसश्चेन्द्रियभावात्  न वाच्यं लक्षणान्तरम् इति , तंत्रान्तरसमाचाराच्चैतत् प्रत्येतव्यम् इति -- परमतम् अप्रतिषिद्धम् अनुमतम् इति
हि तन्त्रयुक्तिः ।

(तन्त्रयुक्तिः = तन्त्रेषु या युक्तिः / रीतिः  -- यौगिकः न तु रूढः)

Here it would have been more appropriate  had वात्स्यायन quoted ' अनुक्तमन्यतो ग्राह्यम् ' as मनस् is said in
वैशेषिकदर्शनम् ( अणु मनः etc) -- समानतन्त्रत्वात् ।

मनसः असान्निध्यम् is **स्तम्भावस्था** -- **आलङ्कारिकाः -- यथा शकुन्तलाया** -- ' विचिन्तयन्ती यमनन्यमानसा ....' ।

The न्याय ' अनुक्तमन्यतो ग्राह्यम् ' -  must be an offshoot of the मीमांसान्याय -- प्रकृतिवद्विकृतिः कर्तव्या (अतिदेशवाक्यम्)।

यत्र समग्राणि अङ्गानि उक्तानि स प्रकृतियागः यथा दर्शपूर्णमासयागः । यत्र कानिचन अङ्गानि उक्तानि अन्यानि च प्रकृतियागात्  ग्राह्याणि सः विकृतियागः  यथा सौर्यादिः इष्टिः ।

प्रकृतियागे नैराकाङ्क्ष्यम् विकृतियागे तु साकाङ्क्षत्वम् इति विवेकः ।

उपसंहारो नाम सामान्ये प्राप्तस्य विशेषे नियमनम् ( न तु उपक्रमोपसंहारयोः अन्यतरः ) --

" सामान्यविधिरस्पष्टः संह्रियेत विशेषतः "

तत्र अनारभ्यविधिः सामान्यविधिः , मित्रविन्दादिप्रकरणस्थस्तु विशेषविधिः ।

गुणानाम् उपसंहारः गुणोपसंहारः ।
यन्नाम्नातं स्वशाखायां परोक्तमविरोधि च ।
विद्वद्भिस्तदनुष्ठेयम् अग्निहोत्रादिकर्मवत् ॥ **कात्यायनस्मृतिः , 3-3**

बह्वल्पं वा स्वगृह्योक्तं यस्य यावत्प्रचोदितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥ **शातातपः**

अयं शातातपस्य पक्षः **' अशक्तपक्षः ' इति मीमांसकाः ।**

शातातपो 'ब्रवीत् ' -- इति  बहुत्र तस्य वचनं प्रमाणत्वेन स्वीक्रियते किल । तस्मात्  अनिष्टमपि ' हेयः ' इति अनुक्त्वा ' अशक्तपक्षः '
इति उक्तम् ।
पूर्वमीमांसायां शाखान्तराधिकरणं  ( वेदान्ते'पि इदम् ) , प्रकृतिवद्विकृतिः कर्तव्या इति च मनसिकृत्य सर्वथा श्रुत्युक्तकर्मणां ( श्रौतानां गृह्याणामपि ) यथा बाधः मा भूत् तथा विविधाः न्यायाः आश्रयणीयाः -- ' आम्नायस्य क्रियार्थत्वात् ...' इति मुनिवचनात् इति तेषामभिप्रायः ।
आपद्धर्मास्तु अशक्तानां विशिष्य नित्यकर्मानुष्ठाने मीमांसकैराद्रियन्ते ।
इदमपि ध्येयम् --
' **आख्यातानाम् अर्थं ब्रुवतां शक्तिः सहकारिणी ' -- इति शाबरभाष्यम् (1-4-29)** . **शाक्तिश्च मानसिकी शारीरिकी आर्थिकी च --ज्योतिष्टोमेन स्वर्गकामो यजेत** इति श्रुतिवाक्येन न सर्वस्यापि जनस्य यागानुष्ठाने योग्यतासिद्धिः , किन्तु उक्तशक्तित्रयविशिष्टस्यैव ।

**आत्मगुणेषु ' अनायासं ' परिगणयति गौतमधर्मसूत्रम् । सापि अत्र अनुग्राहिका** । न च ' **शिवरात्रौ जागृयात्** ' इति नियमः मादृशेषु प्रवर्तते - सत्यामपि  तदनुष्ठाने प्रबलेच्छायाम् शरीरप्रकृतिविरोधात् - आयासकरत्वात् जागरणस्य । आयासश्च शरीरस्य मनसः उभयोर्वा पीडा ।
अत एव **षष्ठे पूर्वमीमांसायां नित्यकर्मानुष्ठानस्य यथाशक्तिस्वीकारः - सन्ध्यां मनसा ध्यायेत् , यावज्जीवम् अग्निहोत्रं जुहोति** -- इत्यादीनां श्रुतिवाक्यानां न केनापि सर्वथा सर्वदा अनुष्ठानं  शक्यते इति सार्वजनीनमेतत् ।

तस्मात् स्थितः अशक्तपक्षः इति बोध्यम् ।

# Vidhi and Nishedha

शास्त्रप्राप्तस्य च प्रतिषेधे विकल्पः स्यात् , शास्त्रेण भ्रान्तिनिमित्तरागस्येव  शास्त्रान्तरस्य अत्यन्तबाधायोगत् ।

-- **मीमांसान्यायप्रकाशः**

भ्रान्तिनिमित्तः रागः यत्र इति बहुव्रीहिः - भ्रान्तिप्रयुक्तरागतः प्राप्तिस्थले निषेधशास्त्रस्य रागप्रापितपदार्थबाधकतया
यथा अत्यन्तनिवर्तकत्वं तथा शास्त्रात् प्राप्तिस्थले शास्त्रान्तरस्य न अत्यन्तनिवर्तकत्वम् , उभयोरपि भ्रान्तिमूलकत्वाभावेन
तुल्यप्रामाण्यादिति भावः (this may answer your next question also) .

Example -- **न कलञ्जं भक्षयेत् -- कलञ्जभक्षणम् रागप्रप्तम् ( कलञ्जम् = onion).**

As both are prescribed by वेद , that is **अपौरुषेय** , neither अतिरात्रे षोडशिनं गृह्णाति nor नातिरात्रे षोडशिनं गृह्णाति
is भ्रान्तिमूलक । So न अत्यन्तबाध to विधि by प्रतिषेध ।

Try to understand the problem --

**स्वाध्यायो'ध्येतव्यः (तैत्तिरीयारण्यकम् -2 , स्वाध्यायब्राह्मणम्** ) -- is a Vedic Injunction - so the **मीमांसक**s have to see that no single letter should go waste . For that a number of devices are applied .

Therefore, in this case they followed **विकल्प  rather than पर्युदास** ।

For a complete understanding of the scenario one  has  to  go thru the उत्तरार्धम् of मीमांसान्यायप्रकाश।

You can take ' **ज्योतिष्टोमेन स्वर्गकामो यजेत** ' - this is a **काम्यकर्म**  - not performing that will not generate sin.

'**मा हिंस्यात् सर्वा भूतानि** ' - is a **निषेध ।**

Both these sentences are परस्परनिरपेक्ष -- but we do not call it **विकल्प** ।

Here is an important point with regard to **नित्यकर्मानुष्ठानम्** --

**कुमारिल** says -- **सन्ध्यावन्दनादीनां नित्यकर्मणाम् अननुष्ठाने प्रत्यवायः (पापम्)** ।

**शंकराचार्य** in several commentaries refuted this **सिद्धान्त** and questioned - **how can there be any पापम् when there is no कर्म at all.**

# वाक्यनिर्वचनम्

A scholar can do justice if and only if he has got the knowledge of **पदवाक्यप्रमाणशास्त्रs, viz व्याकरणम् , मीमांसा (पूर्वमीमांसा) and न्यायवैशेषिके।**

The definition of a **वाक्यम् / महावाक्यम्** is offered by **Jaimini in मीमांसा (अध्या 2- पा1- अधि14- सू 46) --**

**अर्थैकत्वात् एकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् -**

This **सूत्रम् is in यजुःपरिमाणाधिकरणम् -- यजुः means वाक्यम्** । In **यजुर्वेद** we come across text wherein it is difficult to decide as to what is the length of a **यजुः** -- **कियदेकं यजुः इति न ज्ञायते** ।

**'इषेत्वोर्जेत्वा वायवस्थ ....' (beginning of कृष्णयजुर्वेद |**

**This सूत्रम् is useful in deciding the length of a यजुः** ।

KumArila in **तन्त्रवार्तिकम्** , under this सूत्रम् says that this definition is useful in वेद as well as लोक - **मन्त्रब्राह्मणलोकेषु वक्तव्यं क्वोपयुज्यते** ।

This is the origin of **वाक्यनिर्वचनम्** ।
This is a **निर्वचनम् that is universal , i e applicable to any language. Just like Panini's कारकप्रक्रिया ।**

Notice one thing - Jaimini , deliberately did not insert the term **' पदम् ' in the सूत्रम्** - simply to make it
**a common definition for a वाक्यम् as well as महावाक्यम् ।**

If the meaning to be denoted (speech or writing) is short you employ a **वाक्यम्**, whereas if the meaning is large then you go for a **महावाक्यम्** ।

Visvanatha also says - **वाक्योच्चयो महावाक्यम् , आकाङ्क्षादियुक्त एव , यथा रामायणभारतरघुवंशादि** ।

Any stretch of language beyond a sentence is a Discourse.

The term ' **अर्थ '** in the above **जैमिनिसूत्रम्** has got two meanings -- ' **शाब्दार्थः ' and ' प्रयोजनम् '** ।

" if a single meaning is proposed or if a single purpose is served , and when separated , if the parts
are found to be wanting / expecting , then that is a वाक्यम् " ।

**गौः अश्वः पुरुषः हस्ती** - no single meaning is denoted nor any single purpose is served by this group
of words - and when separated none of these words is found to be expecting - so this group of
words cannot be called a वाक्यम् ।

**चैत्रः - what is he doing ? पचति** ।

**पचति - कः पचति ? चैत्रः** ।

So **चैत्रः पचति - is a वाक्यम्** ।

But **Jaimini says आकाङ्क्षा only . what about योग्यता and सन्निधि** ? They are implied .

No sane person says - **चैत्रः वह्निना सिञ्चति** ।

**आकाङ्क्षा is to be put to rest whereas योग्यता lives on** .

If one says ' **चैत्रः ' at 6 am and ' पचति ' at 6 pm** it cannot be a **वाक्यम्** ।

Similarly if one says the following - **चैत्रः 'भज गोविन्दं भज गोविन्दं' पचति** - it cannot be a वाक्यम् ।

So there should not be any lengthy pause (time) or interference of another **ध्वनि / शब्द** in between the words of a वाक्यम् -- this is called **सन्निधि** ।

In other works --

मीमांसकs also say -- **समभिव्याहारो वाक्यम्** -- **समभिव्याहारः = सामीप्यम्** -- if two or more words are pronounced in proximity then it can be a वाक्यम् । Obviously it happens when there is **आकाङ्क्षा** ।

We come across two definitions of a वाक्यम् in **महाभाष्यम् under समर्थः पदविधिः (पा 2-1-1)** --

**आख्यातं साव्ययकारकविशेषणं वाक्यम् and एकतिङ् वाक्यम् ।**

But these are **पारिभाषिकवाक्यलक्षणे**, exclusively useful for some (**निघातयुष्मदस्मदादेशाः**) grammatical applications.

For every **दर्शनम्** , it is the **जैमिनिवाक्यनिर्वचनम्** that is to be taken as a **प्रमाणम्** ।

आख्यातशब्दः संघातः जातिः संघातवर्तिनी ।
एको'नवयवश्शब्दः क्रमो बुद्ध्यनुसंहृतिः ॥
पदमाद्यं पृथक्सर्वं पदं साकाङ्क्षमित्यपि ।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम् ॥ **वाक्यपदीयम् , वाक्यकाण्डः , 1,2**

न्यायवादिनाम् = दर्शनकाराणाम्

Hari summarizes the different definitions offered by different systemists for a वाक्यम् ---

वाक्यम् is of two types -- **सखण्डम् - अखण्डम्**

सखण्डम् -- 1 . **अभिहितान्वयवादः** ( **भाट्टमीमांसकाः , नैयायिकाः** ) -- 1.पदसंघातः 2.पदक्रमः
2. **अन्विताभिधानवादः** (**प्राभाकरमीमांसकाः**) - 1. आद्यं पदम् 2.पृथक्सर्वं पदं साकाङ्क्षम् 3.आख्यातशब्दः

अखण्डम् ( **स्फोटः - वैयाकरणाः**) --- 1.बाह्यम् -- 1.व्यक्तिः (एकः अनवयवः शब्दः) 2.जातिः (संघातवर्तिनी जातिः)
2.आन्तरः -- बुद्ध्यनुसंहृतिः

1. **आख्यातशब्दः वाक्यम्** -- The क्रियावाचकपदम् would get connected with कारकs and generates a वाक्यार्थ that denotes प्रवृत्ति / निवृत्ति । The rest of the words would create a संस्कार that helps in understanding that this वाक्यार्थ is different from other वाक्यार्थs .

2.**पदसंघातं वाक्यम् --** वाक्यम् is denoted by the परस्परान्वय of पदs and such a पदसमुदाय itself is वाक्यम् ।

3.**पदसंघातवर्तिनी जातिः वाक्यम्** -- ' देवदत्त दण्डेन गाम् आनय ' - while pronouncing such a वाक्यम् , the वर्णs, which are ध्वनिs and also अनित्य and क्रमिकाः , are not available simultaneously . Then a शब्द, that is different from the पदs such as देवदत्त , also नित्य and अनवयव , is revealed . The same is वचक and it is nothing but जातिरूपस्फोट ।

4.**एकः अनवयवः शब्दः वाक्यम्** -- वर्णs and पदs are असत्य । A शब्द, that is revealed by those ध्वनिs, नित्य, विभागरहित and एक, in the form of स्फोट is वाचक ।

5. **पदक्रमः वाक्यम्** -- According to these people - वर्णानां क्रमः पदम्, पदानां क्रमः वाक्यम् ।

6.**बुद्ध्यनुसंहारः वाक्यम्** -- The क्रम (sequence) of वर्णs , that is there when a वाक्यम् is pronounced clearly is not स्थिर (stable) . Therefore, a शब्दतत्त्वम् , that is there in every प्राणी in the form of अन्तरात्मा / अन्तर्यामी, takes place in the बुद्धि , which , although does not have अक्षरचिह्नs and पदविभाग , but looks like having the same. The स्मरणम् , that took place due to the संस्कारs of such बुद्धिs , is a वाश्क्यम् that is नित्य and निरवयव , and the same is वाचक । It is वाक्यम् ।

7. **आद्यं पदं वाक्यम्** -- It may be a क्रिया or नाम, the पदम् that is employed in the beginning, is the वाचक of the वाक्यार्थ । It indicates the rest of the connected अर्थs also as क्रिया and कारक have got an अविनाभावसंबन्ध । The rest of the पदs will be useful in clarifying the भेद with other वाक्यर्थs .

8.**प्रत्येकं साकाङ्क्षं पदम् वाक्यम्** -- All पदs having परस्परान्वयापेक्षा are प्रत्येकम् वाचकानि ।

**Hari** quotes **Jaimini (अर्थैकत्वादेकं वाक्यम्)** --

साकङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम् ।
कर्मप्रधानं गुणवत् एकार्थं वाक्यमिष्यते ॥ **वा प , वा कां , 4**

कर्मप्रधानम् = क्रियाप्रधानम् , गुणवत् = विशेषणसहितम्

# षोडशोपचारैः पूजा

मूलेनावहयेद्देवीं श्रवणेन विसर्जयेत् ’ ----

आवाहनम् = षोडशोपचारैः पूजा ।

If the पूजा is for some limited period then there will be विसर्जन at the end . If there will be नित्यपूजा
just like in a देवालय then there will not be विसर्जनम् ।

गणपतिपूजा if done for one day (3 times ) then at the end of सायंकालपूजा there will be विसर्जनम् ।

If it is for nine days (नवरात्राः) then there will be विसर्जनम् / उद्वासना at the end of the last पूजा ।

Same is the case with any पूजा -- वेङ्कटेश्वरपूजा etc.

प्राणप्रतिष्ठापनम् is done with the same मन्त्र --- असुनीते पुनरस्मासु चक्षुःपुनःप्राणमिह नो धेहि भोगम् । ......

Others may do with श्लोकs.

पूर्वमीमांसा says - one has to do मन्त्रार्थस्मरणम् while reciting the मन्त्र ।
There is not much difference (may / may not be न्यास etc) in the procedure from Kerala up to Gujarat/Kashmir in षोडशोपचारपूजा ।

# यागस्वरूपम्

**यागस्वरूपम् कात्यायनेन निरूपितम् --**

' यज पूजासङ्गतिकरणदानेषु ' इति धातोः निष्पन्नस्य याज्ञिकैः परिभाषितस्य द्रव्यदेवतामयस्य संस्कृताग्न्यधिकरणस्रुक्स्रुवादि-
द्रव्याद्यधिष्ठित-हविस्साधनक-आध्वर्यवाद्यर्त्विक्साध्य-स्वर्गाद्युद्देश्यक-मन्त्रपूर्वक-षडष्टादशाद्यङ्गयागनिर्वर्त्यस्य कर्मविशेषस्यैव
यज्ञपदव्यपदेश्यत्वात् - अत एव **द्रव्यं देवता त्यागः यागः** ।

**देवतोद्देशेन क्रियमाण-स्वस्वत्वनिवृत्यनुकूलो व्यापार एव याग इति मीमांसाशास्त्रम्** ।

**तत्रापि तिष्ठद्धोमाः वषट्कारप्रधानाः याज्यापुरोवाक्यावन्तः यजतयो भवन्ति । उपविश्य क्रियमाणहोमाः स्वाहाकारप्रधानाः जुहोतयः। एत एव दर्विहोमाः इत्यप्युच्यन्ते ।**
अत एव स्वाभाविकादानप्रदानप्रक्रियायां यज्ञत्वं न सङ्गतम्। तस्यः स्वतः सिद्धत्वात् । विधानानुपपत्तेश्च ।
विधिलक्षणलक्षितस्य विधेः त्रैविध्यं वर्तते इति --
**विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति ।**
**तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते** ॥ इति मीमांसकप्रसिद्धेश्च ।

**अत एव ब्रह्मज्ञानेऽपि यज्ञत्वारोप एवेति वक्तव्यम् ।**

**ब्रह्मार्पणं ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणा हुतम् ।**
**ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ इति । (this is from भगवद्गीता )**

There is difference of opinion as far as याग and होम are concerned between कात्यायनश्रौतसूत्र and पूर्वमीमांसा।

**मीमांसकानां परिष्कारः** --

**यागत्वेन होमत्वेन ( अर्थात् देवताः उद्दिश्य) द्रव्यत्यागः प्रधानत्वेन, तस्य द्रव्यस्य विहितप्रदेशसमर्पणम् ( अर्थात् प्रक्षेपः) अङ्गत्वेन च यत्र स यागः ।**
**द्रव्यत्यागप्रक्षेपः यत्र प्रधानम् सः होमः ।**
**So होम is an अङ्ग in a याग whereas in होम - ' द्रव्यत्यागप्रक्षेप is प्रधान ।**

**भाट्टदीपिका ( अध्या 3 पा 3 अधि 18 ) --**

वार्तिककारस्तु **न यागहोमयोः अभेदः ।** याज्ञिकानां देवतोद्देशपूर्वकद्रव्यत्यागे प्रक्षेपाङ्गके ' **यजि** ' पदप्रयोगात् , देवतोद्देशद्रव्य-
त्यागप्रक्षेपेषु समप्रधानेषु ' **जुहोति** ' प्रयोगात् ।
**प्रक्षेपाङ्गकक्रियद्द्वयवृत्तिजातिः यागत्वम् , क्रियात्रयवृत्तिजातिश्च होमत्वम् इति तयोः भेदात्** ।

**वार्तिककार** **means Kumarilabhatta.**

# शब्दनित्यत्वम्

मीमांसकs resort to प्रत्यभिज्ञा in order to prove शब्दनित्यत्वम् ---

सोऽयं देवदत्तः - is an example of प्रत्यभिज्ञा (in all शास्त्रs ) - this is the same Devadatta who is seen earlier .

In the present case it is - सोऽयं गकारः - unless and until the गकार is नित्य , how can one use the sentence - सोऽयं गकारः ?

(This is the same गकार I heard earlier)

**कुमारिल ( श्लोकवार्तिकम् - शब्दनित्यताधिकरणम् - 366) - quotes a न्याय --**

तावत्कालं स्थिरं चैनं कः पश्चात् नाशयिष्यति

(एनम् = शब्दम् ) - the शब्द was eternal / immutable till that moment and who can destroy such a शब्द later ?

प्रत्यभिज्ञा is जातिनिबन्धना (depends on जाति which is नित्य ) - वेदान्तिन्s and बौद्धs do not accept जाति and for others it is नित्या।

**Another dimension to this argument is that Panini is brought into picture by जैमिनि, शबरस्वामी and कुमारिल --**

**' संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' (पा 5-4-17) - is a सूत्रम् that rules कृत्वसुच्प्रत्यय in the context of repetition of a क्रिया ।**

**देवदतः अष्टकृत्वः भुङ्क्ते (Devadatta is eating eight times ) - is an example . Here the same क्रिया is repeatedly done by Devadatta.**

There cannot be any क्रिया without resorting to any द्रव्यम् and therefore the द्रव्यम् is नित्य (it is called सत्त्व = सीदन्ति अस्यां जातिगुणक्रियाः)

Look at the usage -- **अष्टकृत्वः गोशब्दः उच्चरितः ( but not अष्टौ गोशब्दाः उच्चरिताः )**

Have a glance t the text ( **श्लोकवार्तिकम् with न्यायरत्नाकरव्याख्या of पार्थसारथिमिश्र** ) --

ननु एवमपि स्थायित्वमात्रं सिद्ध्यति , न नित्यत्वम्?  अत्राह -

**तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यति ।**

तच्च **अनपेक्षत्वसूत्रे ( जै सू 1-1-21 )**  वक्ष्यते इत्याह --

अनपेक्षत्वसूत्रेण तच्चैतत् साधयिष्यते ॥ 366

**संख्याभावात् ( जै सू 1-1-20 )** | '  अष्टकृत्वो गोशब्द उच्चरित इति हि वदन्ति नाष्टौ गोशब्दाः '
(शाबरभाष्यम्) इति भाष्यम् , तस्याभिप्रायमाह --

**क्रियावतामभेदे हि क्रियावृत्तिषु कृत्वसुच् ।**
**तत्प्रयोगात्  ध्रुवं तस्य शब्दस्यावर्तते क्रिया ॥367**

यो'यं क्रियाभ्यावृत्तिगणने विहितः कृत्वसुच्प्रत्ययः स च क्रियावतामभेदे भवति , **तेन कृत्वसुच्प्रत्यययोगात् तस्यैव पूर्वोच्चरितकृत्वसुच्कस्य पुनरुच्चारणम् अनुवर्तते इति ।**

# <u>आहार्यारोपः  and  गौणीवृत्तिः</u>

**Question:**
Here are two terms: आहार्यारोपः  and गौणीवृत्तिः.  Are the two different concepts or the same?

**Answer:**
The term गुण is used in the sense of अप्रधान । गुणादागतः गौणः - सा गौणी वृत्तिः ।

The origin of गौणीवृत्ति lies in गुणवादस्तु (पू मी 1-2-1-10) - अर्थवादाधिकरणम् । A detailed discussion is available in तत्सिद्धिपेटिकाधिकरणम् --
तत्सिद्धि-जाति-सारूप्य-प्रशंसा-भूम-लिङ्गसमवाया इति गुणाश्रयः ( पू मी 1-4-12-23)

Sabarasvamy discussed the six items with examples --

1. तत्सिद्धिः --
तेन प्रस्तरेण सिद्धिः यजमानस्य कार्यसिद्धिः - तदर्थं यजमाने प्रस्तरशब्दप्रयोगः ।

There are sentences like - यजमानः प्रस्तरः, यजमानः एककपालः etc (तै सं 2-6-5). प्रस्तरः = a bundle of दर्भs.

Are these sentences गुणविधायकानि or अर्थवादाः? A गुणविधि is for अपूर्वार्थविधि and अर्थवाद is not useful.The sentences are to be made useful, so they are गुणविधिs - पूर्वपक्षः ।
If it is accepted that they, यजमान and प्रस्तर can be exchanged. But the fact is that neither can do the duty/कर्मof the other and a number of विधिs will be affected. It is a गौणप्रयोग as प्रस्तर and एककपाल are fulfilling the अभीष्ट of यजमान । By स्मानाधिकरण्यप्रयोग is possible due to गुणसंबन्ध । So these are अर्थवादs -- सिद्धान्तः ।

2. जातिः --

आग्नेयो वै ब्राह्मणः, ऐन्द्रो राजन्यः, वैश्यो वैश्वदेवः ( तै सं 2-6-3) - are these गुणविधिs or अर्थवादs ?

गुणविधिs is पूर्वपक्ष । विधिस्तुतिसंवादमेव एतानि वाक्यानि कुर्वन्ति -अग्निसंबन्धं पुरस्कृत्य अग्न्यादिशब्दाः अनग्निषु ब्राह्मणादिषु प्रयुज्यन्ते।
अयमेव गुणवादः  - सिद्धान्तः ।

3. सारूप्यम् --

सारूप्यम् = सादृश्यम्

यजमानो यूपः , आदित्यो यूपः etc -- अपूर्वार्थविधनात् एतादृशानि वाक्यानि गुणविधयः - पूर्वपक्षः ।

यजमान and यूप cannot perform each other's duty - so following सादृश्यगुण they are अर्थवादs meant for विधिस्तुति। यजमान is tall like a यूप , यूप is तेजश्शाली like आदित्य - so in both the places there is सामानाधिकरण्यम् following both the गुणs - सिद्धान्तः ।

4.प्रशंसा --

अपसवो वा अन्ये गोअश्वेभ्यः पसवो गोअश्वाः (तै सं 5-2-9) अयज्ञो वा एष यो'सामा , असत्रं वा एतत् यदच्छन्दोमम् etc. Are they गुणविधिs or अर्थवादs ?
गुणविधयः - पूर्वपक्षः ।
If it is said that these are गुणविधिs then only cows and horses will be पशुs but not the rest. Same is the case with others - then the विधिवाक्य s connected with these will be redundant - so they are not गुणविधिs but अर्थवादs - सिद्धान्तः ।

5.भूमा --

भूमा = बाहुल्यम्

सष्टीरुपदधाति ( तै सं 5-2-9 ; 5-3-4) - इष्टकोपधानम् (arranging the bricks) is being done . In certain instances, it happens with सृष्टिलिङ्गकमन्त्रs and in certain places there will not be similar मन्त्रs. But मन्त्र shows as if in all places of इष्टकोपधान it is happening with सृष्टिलिङ्गकमन्त्रs only.

यत्सप्तदशेष्टका उपदधाति ( one should arrange seventeen bricks) - here there are fourteen सृष्तिलिङ्गककन्त्रs and three असृष्टिलिङ्गकमन्त्रs . Nevertheless, since there are more सृष्टिलिङ्गकमन्त्रs the असृष्टिलिङ्गकमन्त्रs are also said as सृष्टिलिङ्गकमन्त्रs.

So here - सृष्टीरुपदधति (5-3-4) is a गुणविधि or अर्थवाद - is the question. गुणविधि is पूर्वपक्ष ।

If गुणविधि is accepted then one has to apply a विशेष - these are सृष्टिलिङ्गकमन्त्रs and others are असृष्टिलिङ्गकमन्त्रs. But in bricks, no such a distinction is seen. So, it is an अनुवाद of मन्त्रs in उपधान ।

6. लिङ्गसमवायः --

It is just like the earlier one -- प्राणभृत उपदधाति ( तै सं 5-2-10) is a मन्त्र - आज्यानीरुपदधति is another मन्त्र ।

Here there more प्राणभृल्लिङ्गमन्त्रs and less विलिङ्गमन्त्रs. So, following the number of the former the term प्राणभृत् is employed for विलिङ्गमन्त्रs also.
Both 5 and 6 follow छत्रिन्याय - छत्रिणो यान्ति - only some of them have umbrellas.

**मीमांसा** --

गौणी is different from लक्षणा --

**तन्त्रवर्तिकम् ( 1-4-12-23) --**

अथवा गौण्या वृत्तेरिह निमित्तमभिधीयते , न लक्षणायाः । **किंचानयोर्भेदो'स्ति ? बाढमस्ति । कुतः**

अभिधेयाविनाभूते प्रवृत्तिर्लक्षणेष्यते ।
लक्ष्यमाणगुणैर्योगात् वृत्तेरिष्टा तु गौणता ॥

**न्यायदर्शनम्** --

गौणी is not different from लक्षणा -- सहचरणस्थान ... (न्यायसूत्रम् 2-2-63)

**व्याकरणम् --**

गौणी is not different from लक्षणा --

**महाभाष्यम् --**

(पुंयोगादाख्यायाम् 4-1-49) - तात्स्थ्यात् ताद्धर्म्यात् ...।

गौणमुख्ययोः मुख्ये कार्यसंप्रत्ययः  (अग्नेः सुत्स्तोमसोमाः , 8-3-82)

**प्रौढमनोरमा ( प्रातिपदिकार्थ...)  --**

**वृत्तिस्तु शक्तिर्लक्षणा च । गौणी तु लक्षणान्तर्भूता पृथग्वा अस्तु ।**

**शब्दरत्नः --**

सादृश्यसम्बन्धमूलकलक्षणाया एव गौणीत्वमिति भावः (this is clear in **तन्त्रवार्तिकम्** )

**वेदान्तदर्शनम् -- शांकरभाष्यम् ( 4-3-13)**

मुख्यगौणयोश्च मुख्ये कार्यसंप्रत्ययो भवति

**आहार्यज्ञानम् --**

In लोक, अनाहार्यज्ञानमेव प्रमाणम् । But Panini, for some purpose wanted आहार्यज्ञानम् --

पूर्वत्रासिद्धम् ( 8-2-1) - पूर्वस्मिन् शास्त्रे कर्तव्ये परं  शास्त्रम् असिद्धं स्यात् ।

Actually, परं शास्त्रं सिद्धमेव भवति । But असिद्धत्वारोप on सिद्धत्वम् ।

**In गौणीवृत्ति -- अग्निर्माणवकः -- अग्नित्वगुणारोपणम् in माणवक । It is an अर्थवाद and not a विधि।**

**In आहार्यारोप - पूर्वत्रासिद्धम् - it is विधि, not अर्थवाद ।**

# Diksha for Women

दीक्षा ---

This concept starts with याग -- there the यजमान has to take दीक्षा and the wife is considered as having taken the same --

स्ववतोस्तु वचनात् ऐककर्म्यं स्यात्  --- पूर्वमीमांसासूत्रम् - 6-1-4-17

This सूत्रम् is from - यागे दम्पत्योः सहाधिकाराधिकरणम् --

after विवाह, the पति and पत्नी will be treated as one and they will have combined अधिकार in कर्मs and will have the same rights on all the things (wealth).

Even आपस्तम्बगृह्यसूत्रम् rules --

पाणिग्रहणात् सहत्वं कर्मसु पुण्यफलेषु च

(पुण्यफलेषु च = partakes in the पुण्य of पति but not in the पाप of पति)

Therefore, दीक्षा for a स्त्री is not permitted by शास्त्रs.

What about examples of Gargy, etc.
These pramanas seem somewhat indicating that women were allowed to take as well as give diksa mantras.

Most of these quotations are popular .

पूर्वमीमांसा is a दर्शनम् , also called वाक्यशास्त्रम् - it has to decide the meaning / purport of Vedic sentences / texts .

In this युग we follow जैमिनीयपूर्वमीमांसा (there may be काशकृत्स्नमीमांसा etc.) and आपस्तम्बगृह्यसूत्रम् ।

पुरा कल्पेषु नारीणाम् etc is not applicable in this कल्प ।

Dilution of शिष्टाचार is seen across the country --

some people are doing हवन (हवः) with pants and shirts.

वामाचार ( तन्त्रम् )  is अशिष्टाचार ।

We come across अर्चकs with vests in temples across northern India.

स्वाध्यायो'ध्येतव्यः ( तै आ -2 ) - is interpreted as - वेद , पुराण etc by रामानुजीयाः ।

The Director of a famous वैष्णवपीठ gave me a copy of श्रीभाष्यम् with commentary, श्रुतप्रकाश, to find out the instances, where it went against पूर्वमीमांसा । Even after one year I do not find time.

You may read between the lines.

There are many books in Indian vernaculars which advocate अवैदिकसंप्रदायs and we cannot do anything to arrest this tendency --

न बुद्धिभेदं जनयेत् अज्ञानां कर्मसङ्गिनाम् (गीता) ।

The following may be relevant (निर्णयसिन्धुः) --

ब्राह्मण्यपि हरं विष्णुं न स्पृशेत् श्रेय इच्छती ।
सनाथा मृतनाथा वा तस्या नास्तीह निष्कृतिः ॥
स्त्रीणाम् अनुपनीतानां शूद्राणां च जनेश्वर ।
स्पर्शने नाधिकारो'स्ति विष्णोर्वा शंकरस्य वा ॥ स्कन्दपुराणम्

यदि भक्तिर्भवेत्तस्य स्त्रीणां वापि वसुन्धरे ।
दूरादेवास्पृशन् पूजां कारयेत् सुसमाहितः ॥ वाराहोक्तिः

सालग्रामशिलामात्रे निर्बन्धः , न प्रतिमादौ ॥

आक्षारितः क्षारितो'भिशस्ते '  -- अमरः , 3- विसेष्यनिघ्नवर्गः ।

शसु = हिंसयाम् (भ्वादिः) , क्तः ।

अभिशस्तः = one accused of परस्त्रीगमनम् (sometimes other महापाप also )

# Abhisankhya

अहानि वा अभिसंख्यत्वात् ( पू मी सू 6-7-40 )

There is a सत्रम् --

पञ्चपञ्चाशतः त्रिवृतः संवत्सराः ...... विश्वसृजामयनं सहस्रसंवत्सरम् ।

Here the मीमांसा is about the meaning of ' सहस्रसंवत्सरम् ' - there are eight पूर्वपक्षाः ।

Then the सिद्धान्त is --

अहानि वा अभिसंख्यत्वात्

वाशब्दः पक्षं व्यावर्तयति -- all the eight पूर्वपक्षs are untenable .

Since the समास -- सहस्रसंवत्सरम्, when taken as it is (one thousand years) is difficult to apply to humans, there is no other go but to resort to लक्षणा / गौणी ।

गौणी is to be applied to 'सहस्र'  or 'संवत्सर' ?

' तस्मात् संख्याशब्दं वा संवत्सरशब्दं वा गौणमाश्रित्य मनुष्याधिकारः समाश्रयितव्यः' - **शास्त्रदीपिका of Somanatha .**

How to decide?

Since the term 'सहस्रम्' - has got the मुख्यार्थ and has got the capacity to render a single meaning - ' one thousand ' there cannot be गौणी ।

On the other hand, the term ' संवत्सर 'is अप्रधान and has got different meanings - year due to  सौरमान , चान्द्रमान etc (ज्यौतिषम् सिद्धान्तस्कन्धः )  and as the meaning cannot be decided it becomes a गौणशब्द --

तत्रापि संख्याशब्दस्य मुख्यत्वात् एकार्थनिश्चयसामर्थ्याच्च न स्वार्थत्यागः । संवत्सरपदं तु जघन्यत्वात् सौरचान्द्रमसाद्यनेकार्थसाधारणत्वेन च अर्थनिश्चयासामर्थ्यात् गौणं भवति । ibid

So as such - since you have interpreted the term त्रिवृत् as स्तोमविसिष्टः दिवसः here also the word संवत्सर means a दिवस ( अहः) -

तस्मात् त्रिवृदादिशब्दसामञ्जस्यात् दिवसेषु संवत्सरशब्दः । " त्रिवृदादिपदैः स्तोमविशिष्टम् अहरुच्यते " ibid .

Then there will be अभिसंख्या -- सामानाधिकरण्यम् = एकार्थबोधकत्वम् --

नीलम् उत्पलम् - one blue lotus - there is an acceptable meaning rendered by both the words combinedly -
but here if you say - सहस्रसंवत्सरम् means one thousand years , since a man does not live for so long the सामानाधिकरण्यम् is gone - so take संवत्सरशब्द as गौण and interpret as - one thousand days ( day is daytime - अहः ) ।

**अन्वयानुपपत्तिः लक्षणाबीजम् इति प्राञ्चः । तात्पर्यानुपपत्तिः लक्षणाबीजम् इति नव्याः ।**

**शक्यसंबन्धो लक्षणा इति नैयायिकाः ।**

सहस्रसंवत्सरम् - ' **कालाध्वनोः अत्यन्तसंयोगे द्वितीया ' पा सू - यथा मासम् अधीते ।**

सामानाधिकरण्यम् is of four types -- **ब्रह्मसूत्रशाङ्करभाष्यम् , अध्याय 4 .**

# References to Various Brahmanas

1.दर्शपूर्णमासाभ्यां स्वर्ग ... शतपथब्राह्मणम् (24अध्यायाः) - 1 & 2 अध्यायौ दर्शपूर्णमासौ

2. अग्निहोत्रम् ... शतपथ . अध्यायः 3 (?)

3. त्रिःप्रथमामन्वाह त्रिः --- दर्शपूर्णमासप्रकरणे - सामिधेनीः पञ्चदश विहिताः - ततः 11 ऋचः - ततः ' त्रिः प्रथमाम् ... ' | मीमांसादर्शनम् - 9-1-9-33

4. उदिते जुहोति -- ऐतरेयब्रा -- 5-5

5.अनुदिते जुहोति -- तैत्तिरीयब्रा 2-1-2-3, 12

6. त्र्यम्बकं यजामहे --- ऋग्वेद - 7-59-12 ; अथर्ववेद - 14-1-17 ; ( शुक्ल) वाजसनेयसं / माध्यन्दिन -- 3-60 ; तैत्तिरीयसं 1-8-6-2 ;  निरुक्तम् - 14-35

7. विज्ञानघनः -- बृहदा. उप - - 2-4-12

8.दुष्यति चाप .. -- महाभाष्यम् - पस्पशाह्निकम् -- यस्तु प्रयुङ्क्ते ....

9.द्वे ब्रह्मणी -- मैत्र्युपनिषत् 6-22 ; महाभारतम् - ( शान्ति )- 12-224-60

10. बुद्धिपूर्वा वाक्कृतिर्वेदे -- वैशेषिकसूत्रम् 6-1-1

11. मन्त्रायुर्वेदवच्च तत्प्रामाण्यम् , आप्तप्रामाण्यात् -- न्यायदर्शनम् 2-1-68

पुत्रकामः --- may be in ताण्ड्यब्राह्मणम् ।

# Rudra

In मन्त्राधिकरणम् ( अध्या 1 पाद 2 ) of पूर्वमीमांसा , Jaimini  takes up the discrepancies across Vedic literature and responds --

(The same discussion can be seen in ऋग्वेदभाष्योपक्रमणिका of सायणाचार्य)

पूर्वपक्षसूत्रम् ---

तदर्थशास्त्रात् , वाक्यनियमात् , बुद्धशास्त्रात् , अविद्यमानवचनात् , अचेतने अर्थसंबन्धात् , अर्थविप्रतिषेधात् , स्वाध्यायवदवचनात् , अविज्ञेयात् , अनित्यसंयोगात् , मन्त्रानर्थक्यम् ।

जै सू , पू मी 1-2-4-31

अर्थविप्रतिषेधात् --

There are some contradictory statements across Vedic literature --

1. अदितिः द्यौः अदितिः अन्तरिक्षम्  ( तै आ 1-13) , (ऋ सं 1-89-10)

2. एक एव रुद्रः न द्वितीयो'वतस्थे ( तै 1-8-6-1) सहस्राणि सहस्रशो ये रुद्राः (तै सं 4-5-11-1)  , ( वा सं 16-54)

In the first instance the same अदिति is द्यौः as well as अन्तरिक्षम्  ?

In the second - there is one रुद्र and there are thousand रुद्रs ?

In ब्राह्मणभाग , अर्थवादs ( स्तुत्यर्थत्वात्)  are meaningful but not in मन्त्रभाग । Therefore , such मन्त्रs are not to be useful in a याग !

सिद्धान्तसूत्रम् --

अविशिश्टस्तु वाक्यार्थः  1-2-4-32

The वाक्यार्थ in लोक and वेद is the same .

गुणात् अविप्रतिषेधः स्यात्  1-2-4-39

The words in the above मन्त्रs are गौण ( not प्रधान ) - in लोक , a person who provides food and shelter is praised thus - त्वमेव माता पिता त्वमेव I Same is the case here also - अदितिः द्यौः अदितिः अन्तरिक्षम् ।

Similarly , if the intended याग is एकदेवत्यम् , then there will be a single रुद्र and if there hundred रुद्रs , i e शतरुद्रदेवत्यम् , there will be hundred रुद्रs .

' देवतान्तात् तादर्थ्ये ' पा -- एकदेवत्यम् ( यत् प्रत्ययः)

'शतरुद्रात् घ च ' पा -- चात् छः - शतरुद्रियम् / शतरुद्रीयम्

There are two chapters in शतरुद्रियम् - नमकम् and चमकम् ।

विनियोगः --

श्रौतम् -- in a याग -- नमकम् is used in क्षीरधारा whereas चमकम् in वसोर्धारा ।

In अतिरात्रम् it will be (both) on the 8th day.

स्मार्तम् -- both are used in रुद्राभिषेक etc.

If रुद्र is at so many places it means just like सर्वं खल्विदं ब्रह्म , सर्वं विष्णुमयं जगत् , सर्वं शिवमयं जगत् -- ie looking into everything with शिवबुद्धि ।

So interpret any such instance with the help of मीमांसा , but not pure logic - it may fail you.

Since people set aside the study of वाक्यशास्त्रम् and started embracing dry logic there are so many problems.

Pl refer to पुराणs for classification of रुद्रs etc.

In the regular पितृतर्पणम् we take वसुरुद्रादित्यरूपाणि ।

# Origin of Vici-taranga nyAya

The origin of some न्यायs --
These are from वैशेषिकदर्शनम् -

In तर्ककौमुदी of लौगाक्षिभास्कर and भाषापरिच्छेद (कारिकावळी) of विश्वनाथपञ्चाननभट्टाचार्य they are seen.  नागेश borrowed in लघुमञ्जूषा ।
My 1980 memory failed me - vaguely remember having seen in प्रशस्तपादभाष्यम् ( and are commented by श्रीधराचार्य in his न्यायकन्दळी ।

शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः।
कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः॥
सर्वश्शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते।
वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता।।
क्दंबकोरकन्यायादुत्पत्तिः कस्यचिन्मते।
उत्पन्नः को विनष्टः कः इति बुद्धेरनित्यता॥ (भाषापरिच्छेदः164, 165,166)

# विग्रहाराधनम्

पूर्वमीमांसा - वेदान्तः

It is Sabaraswamy , who , unnecessarily , started discussion on  the so called विग्रहादिपञ्चकम् ---

देवता वा प्रयोजयेत् अतिथिवत् भोजनस्य तदर्थत्वात्  ( देवतानाम् अदेवताप्रयुक्तत्वाधिकरणम् , पू मी -अध्या 9 पा 1 अधि 4 सू 6 )

यागश्च साध्यरूपत्वात् साधनत्वेन देवताम् ।

गृह्णाति सिद्धरूपा च देवता तस्य साधनम् ॥

तत्तन्मन्त्रार्थवादेतिहासपुराणेष्वपि देवतानामपि तपश्चरणक्रत्वनुष्ठानब्रह्मास्त्रादिमन्त्रतश्च समीहितसिद्ध्यनुकीर्तनात् कर्मण एव फलं गम्यते ।

----- शास्त्रदीपिका

देवताधिकरणम् - ब्रह्मसूत्रशाङ्करभाष्यम् (1-3-33) --

अपि च विधिभिरेव इन्द्रादिदैवत्यानि हवींषि चोदयद्भिः अपेक्षितमिद्रादीनां स्वरूपम् , न हि रूपरहिता इन्द्रादयः

चेतस्यारोपयितुं शक्यन्ते ; न च चेतस्यनारूढायै तस्यै देवतायै  हविः प्रदातुं शक्यते  ! श्रावयति च - यस्यै देवतायै हविर्गृहीतं स्यात् तां मनसा ध्यायेद्वषट् करिष्यन् ( ऐ ब्रा 3-8-1) | ....

इतिहासपुराणमपि व्याख्यातेन मार्गेण संभवन्मत्रार्थवादमूलत्वात् प्रभवति देवताविग्रहादि साधयितुम् । प्रत्यक्षादिमूलमपि संभवति । भवति हि अस्माकम् अप्रत्यक्षमपि चिरन्तनानां प्रत्यक्षम् । तथा च व्यासादयो देवताभिः प्रत्यक्षं व्यवहरन्तीति स्मर्यते । यस्तु ब्रूयत् इदानीन्तनानामिव पूर्वेषामपि नास्ति

देवादिभिः व्यवहर्तुं सामर्थ्यमिति स जगद्वैचित्र्यं प्रतिषेधेत् । ....तस्मादुपपन्नः मन्त्रादिभ्यः देवादीनां विग्रहवत्त्वाधिगमः ।...

There is प्राणप्रतिष्ठापनमन्त्र -- असुनीते पुनरस्मासु चक्षुः प्राणमिह नो धेहि भोगम् । ......

So one can prepare a विग्रह / प्रतिमा (with rice-flour / clay / turmeric /stone etc ) of इष्टदेवता - do प्राणप्रतिष्ठापनम् - and perform पूजा ।

Building some structure following पाञ्चरात्र and other आगम-s has been there since time immemorial .

# सङ्कर्षकाण्डः

1. Samkaracarya and Ramanujacarya quoted सङ्कर्ष(ण)काण्डसूत्रम् in प्रदानाधिकरणम् - सू . प्रदानवदेव तदुक्तम् (3-3-28-43) -

शां भा - तदुक्तं सङ्कर्षे - नना वा देवतापृथकग्ज्ञानात् इति ।

भाष्यरत्नप्रभा -

संकर्षो देवताकाण्डम् ।

न्यायनिर्णयः -

संकृष्यते कर्मकाण्डस्थमेव अवशिष्टं कर्म संक्षिप्य उच्यते इति संकर्षो देवताकाण्डम् , तस्मिन्निति यावत् ।

अप्पय्यदीक्षिताः परिमळे -

यद्यपि संकर्षकाण्डो न देवताविचारार्थं प्रवर्तितः । किन्तु द्वादशलक्षण्यविचारितनानाविषयन्यायविचारात्मकः तत्परिशिष्टः , तन्त्रप्रसङ्गवत् उपदेशातिदेशसाधारण्येन प्रकीर्णकः प्रवर्तितः । न हि तत्र देवताविचारेण उपक्रम उपसंहारो वास्ति । ...... तथापि संकर्षे देवताविधानरहितेषु उपांशुयाजादिषु देवता अस्ति न वा , प्रयाजादिषु देवतावाचिनः समिद्बर्हिरादिशब्दाः दर्शपूर्णमासाङ्गप्रसिद्धसमिद्बर्हिरादिपराः तदन्यपरा वा ..... इत्यादिदेवताविचारभूयस्त्वात् भूम्ना संकर्षकाण्डस्यैव देवताकाण्डा इत्यपि व्यवहारो'स्तीति तस्य तेनोपादानम् ।

श्रीभाष्ये --

1. तदुक्तं संकर्षणे - नाना वा देवतापृथक्त्वात् ।

2.तदाह वृत्तिकारः - वृत्तात् कर्माधिगमादनन्तरं ब्रह्मविविदिषेति ।

3.संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति (कर्मब्रह्मशास्त्रयोः ऐकशास्त्र्यम् - see महावाक्यविचारः for details).

निगमान्तदेशिकाः - शतदूषणी --

देवताकाण्डशेषतया श्रीभाष्यकारैः परिगृहीतम् । 'तदुक्तं संकर्षे' इति हि सूत्राण्युदाहरन्ति।

वेदान्तसारः - श्रीरामानुजाः --

अधीतवेदस्य हि पुरुषस्य कर्मप्रतिपादनोपक्रमत्वात् वेदानां कर्मविचारः प्रथमं कार्य इति 'अथातो धर्मजिज्ञासा' इत्युक्तम् । कर्मणां च प्रकृतिविकृतिरूपाणां धर्मार्थकामरूपपुरुषार्थसाधनतानिश्चयः , 'प्रभुत्वादार्त्विज्यम् इत्यन्तेन' ।

प्रस्थानभेदे मधुसूदनसरस्वती --

तथा सङ्कर्षकाण्डमध्यायचतुष्टयात्मकं जैमिनिप्रणीतम् । तच्च देवताकाण्डसंज्ञया प्रसिद्धमपि उपासनाख्यकर्मप्रतिपादकत्वात् कर्ममीमांसार्गतमेव ।

शबरस्वामी (10-4-32) --

स्विष्टकृद्विकारश्च वनस्पतिरिति संकर्षे वक्ष्यते ।

द्वादशाध्याये --

ननु नैव पशोर्हविष्कृदस्ति औषधार्था अवहननार्था वा यथा पत्नी तुल्यवच्छ्रूयते इति संकर्षे वक्ष्यति ।

So here, Sriramanuja, by quoting the first Sutra of पूर्वमीमांसा and the last Sutra (प्रभुत्वात्...) of Samkarsanakanda, it can be surmised that - according to Ramanuja the षोडशलक्षणी is applicable to कर्म ।

वेदार्थसंग्रहे रामानुजाः --

अश्रुतवेदान्तानां कर्मण्यश्रद्धा मा भूदिति देवताधिकरणे अतिवादाः कृताः, कर्ममात्रे यथा श्रद्धां कुर्यादिति सर्वमेकं शास्त्रमिति वेदवित्सिद्धान्तः।

आगमप्रामाण्ये यामुनाचार्याः -

भगवतो जैमिनेः कर्मणः फलोपन्यासःकर्मश्रद्धासंवर्धनाय ।

Scholars feel that - it is विंशतिलक्षणी मीमांसा - षोडशलक्षणी शबरस्वामिप्रणीता , चतुर्लक्ष्णी बादरायणप्रणीता । Even present day Visistadvaitins feel that Kasakrtsna was not at all the author of Sankarsakanda.

प्रस्तावना (p xx) by  समुद्राल वेन्कटरङ्गरामानुजाचार्युलु (Editor) - Samkarsakanda of Jaimini Muni (Sri Venkateswara Vedic Uni , Tirupati, 2009 --

एवंच सङ्कर्षकाण्डकर्तृत्वविषये जैमिनिकर्तृत्वं काशकृत्स्नकर्तृत्वमिति द्विधा अभिप्रायभेदे सति , कृत्स्नस्य देवताकाण्डस्य षोडशाध्यायस्य जैमिनिप्रणीतत्वकथनमेव समुचितं प्रतिभाति ।

श्रीभाष्यकारादिवचनानुसारेण , तत्पूर्वतनशाङ्करवचनानुसारेण , पूर्वतन्त्रभाष्यादिवचनेन च तथैव प्र्तिपन्नत्वात् ।

विशिष्टाद्वैत does not have any special interest in सङ्कर्षणकाण्ड । The only thing to note is they have too much of respect for वेदान्तदेशिक / निगमान्तदेशिक ।

I have a copy of सङ्कर्षकाण्ड with a commentary, भाट्टदीपिका (भाट्टच्न्द्रिका), of भास्करराय ( S S V Vedic Uni, Tirupati, 2009). Since Devatakanda is in the middle of विंशतिशलक्षणी, some may style it - मध्यमकाण्ड also.

There are two available commentaries on Samkarsakanda - by Devaswami and by Bhaskararaya. The later mostly depends on the former and follows भाट्टचन्द्रिका of Khandadeva.